# 2019

## SANSKRIT — HONOURS

**Paper : CC–3**

**(Classical Sanskrit Literature – Prose)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Section – A

**Unit – I**

**(Marks : 10)**

1. कः शुकनासः? स कमुपदिष्टवान्? तत्प्रदत्ता उपदेशाः शुकनासोपदेश इति पाठ्यांशानुसारेण सारतः विव्रियन्ताम्। 1+1+8

**अथवा,**

शुकनासोपदेश इति पाठ्यांशे चित्रितं लक्ष्म्याश्चरित्रं विव्रियताम्। 10

**Unit – II**

**(Marks : 10)**

2. कस्मात् मूलग्रन्थात् शुकनासोपदेश इति पाठ्यांशः समुत्कलितः? गद्यरचनायाः कथाख्यायिकेति भेदद्वयस्य कस्मिन् भेदे तस्य मूलग्रन्थस्यान्तर्भावः सम्भवतीति विचार्यताम्। 1+9

**अथवा,**

"बाणोच्छिष्टं जगत् सर्वम्"— इत्युक्तेः याथार्थ्यं विचार्यताम्। 10

### Section – B

**Unit – I**

**(Marks : 15)**

3. (a) अधोलिखितेषु **पञ्चानां** प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्। 2×5

(i) कस्मिन् मूलग्रन्थे राजवाहनचरितमिति पाठ्यांशस्य अन्तर्भावः? तस्य ग्रन्थस्य रचयितुर्नाम लिख्यताम्।

(ii) कः दर्पसारः? स तपस्यार्थं कुत्र अगच्छत्?

(iii) "मुक्तकण्ठमाचक्रन्द राजकन्या" — अत्र राजकन्याशब्देन का बोधिता? कदा च सा मुक्तकण्ठं क्रन्दितवती?

(iv) "प्रत्यबुध्येतां चोभौ" — अत्र उभौ इत्यनेन कौ बोधितौ?

(v) पूर्वजन्मनि राजवाहनस्य अवन्तीसुन्दर्याश्च नाम किमासीत्?

(vi) क आसीत् चण्डवर्मा? तेन सह मालवराजस्य कः सम्बन्धः?

(vii) का आसीत् बालचन्द्रिका? तस्याः पत्युर्नाम लिख्यताम्।

(b) अधोरेखाङ्कितयोः पदयोः **कस्यचित् एकस्य** संस्कृतभाषया देवनागरीलिप्या च विग्रहवाक्यं प्रदाय समासनाम लेखनीयम्। 2×1

(i) सुप्तयोस्तु तयोः स्वप्ने विसगुणनिगडितपादो जरठः कश्चिज्जालपादोऽदृश्यत।

(ii) दयित त्वत्प्रसादादद्य मे चरितार्था श्रोत्रवृत्तिः।

(c) अधोरेखाङ्कितयोः यथाभिमत**मेकस्य** संस्कृतभाषया देवनागरीलिप्या च व्याकरणसम्मता टिप्पनी लिखनीया। 2×1

(i) पक्वमिदानीं त्वत्पादपद्मपरिचर्याफलम्।

(ii) उत्तमाङ्गना विस्मयविकशिताक्षी सस्मितमिदमभाषत।

(d) अधोरेखाङ्कितयोः **यथाभिमतमेकस्य** संस्कृतभाषया देवनागरीलिप्या च व्युत्पत्तिः कार्या। 1×1

(i) ददृशुश्च तदवस्थं राजकुमारम्।

(ii) "किं किम्" इति सहसोपसृत्य विविशुरन्तर्वंशिकपुरुषाः।

## Unit – II

## (Marks : 15)

4. कथं राजवाहनः शृङ्खलामुक्तोऽभवदिति राजवाहनचरितमवलम्ब्य संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्। 10

**अथवा,**

(a) **कस्यचिदेकस्य** संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या। 6×1

(i) कः स महापरुषो येनैतन्मानुषमात्रदुष्करं महत् कर्मानुष्ठितम्।

(ii) पापे! भजस्व लोहजातिमजातचैतन्या सती।

(b) **कस्यचिदेकस्य** संस्कृतभाषया देवनागरीलिप्या च विग्रहवाक्यं प्रदाय समासनाम लिख्यताम्। 2×1

(i) मानुषमात्रदुष्करम् 4.(a)(i) प्रश्ने;

(ii) अजातचैतन्या 4.(a)(ii) प्रश्ने।

(c) **कस्यचिदेकस्य** संस्कृतभाषया देवनागरीलिप्या च कारकविभक्तिः निर्णेया। 1×1

(i) येन 4.(a)(i) प्रश्ने;

(ii) कर्म 4.(a)(i) प्रश्ने।

(d) **कस्यचिदेकस्य** व्युत्पत्तिः संस्कृतभाषया देवनागरीलिप्या च कार्या। 1×1

(i) भजस्व 4.(a)(ii) प्रश्ने;

(ii) सती 4.(a)(ii) प्रश्ने।

**5. कस्यचित् एकस्य** मातृभाषया अनुवादः कार्यः। 5×1

(a) प्रथमसमवतीर्णेनापहारवर्मणा च स्वहस्तसत्वरसमीकृते मातङ्ग इव भागीरथीपुलिनमण्डले सुखं निषसाद।

(b) स पुनः प्रसाद्यमानस्त्वत्पादपद्मद्वयस्य मासद्वयमात्रं सन्दानतामेत्य निस्तरणीयामिमामापदमपरिक्षीणशक्तित्वं च पञ्चेन्द्रियाणामकल्पयत्।

**Section – C**

**Unit – II**

**(Marks : 15)**

**6.** (a) अधोलिखितेषु **पञ्चानां** प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्। 2×5

(i) हितोपदेशे कति विभागाः सन्ति? तेषां नामानि लिख्यन्ताम्।

(ii) हितोपदेशः केन किमर्थं च रचितः?

(iii) शुकसप्ततिग्रन्थस्य रचयितुर्नाम किम्? तस्मिन् ग्रन्थे कति आख्यानानि सन्ति?

(iv) शुकसप्ततिग्रन्थे आख्यानानां वक्ता कः? स कां तानि अश्रावयत्?

(v) वेतालपञ्चविंशतिकाग्रन्थे क आसीद् वेतालः? ग्रन्थस्यास्य रचयिता कः?

(vi) वेतालपञ्चविंशतिकाग्रन्थे कः कस्मै राज्ञे फलानि दत्तवान्?

(vii) सिंहासनद्वात्रिंशिकाग्रन्थानुसारेण विक्रमादित्याय सिंहासनं केन प्रदत्तम्? तस्य मृत्योः परं तत् पुनः केन प्राप्तम्?

(b) **कस्यचित् एकस्य** संस्कृतभाषया देवनागरीलिप्या च टीका लेखनीया। 5×1

(i) पञ्चतन्त्रम्,

(ii) पुरुषपरीक्षा।